# श्री यतिराज विंशतिः

यः स्तुतिं यतिपति प्रसादिनीं
व्याजहार यतिराज विंशतिं ।
तं प्रपन्न जन चातकाम्बुदम्
नौमि सौम्य वर योगि पुङ्गवम्

श्री माधवाङ्घ्रि जलजद्वय नित्य सेवा
प्रेमा विलाशय पराङ्कुश पाद भक्तम् ।
कामादि दोष हरमात्म पदाश्रितानाम्
रामानुजम् यतिपतिं प्रणमामि मूर्ध्ना ॥१

श्री रङ्ग राज चरणाम्बुज राज हम्सम्
श्रीमत् पराङ्कुश पादाम्बुज भृङ्ग राजम् ।
श्री भट्ट नाथ परकाल मुखाब्ज मित्रम्
श्री वत्स चिह्न शरणं यतिराज मीडे ॥२

वाचा यतीन्द्र मनसा वपुषा च युष्मत्
पादार विन्द युगळं भजतां गुरूणाम् ।
कूराधि नाथ कुरुकेश मुखात्य पुम्साम्
पादानु चिन्तन परः सततं भवेयम् ॥३

नित्यम् यतीन्द्र तव दिव्य वपुः स्मृतौ मे
सक्तं मनो भवतु वाक् गुण कीर्तनेऽसौ ।
कृत्यञ्च दास्य करणे तु करद्वयस्य
वृत्त्यन्तरे अस्तु विमुखं करणत्रयञ्च ॥४

अष्टाक्षराख्यं अनुराज पदत्रयार्थ
निष्ठां ममात्र वितराद्य यतीन्द्र नाथ ।
शिष्टाग्र गण्य जन सेव्य भवत् पदाब्जे
हृष्टाऽस्तु नित्यं अनुभूय ममास्य भुद्धिः ॥५

अल्पाऽपि मे न भवदीय पदाब्ज भक्तिः
शब्दादि भोग रुचिरन्वह मेधते हा ।
मत् पापमेव हि निदानममुष्य नान्यत्
तद्वार यार्य यतिराज दयैक सिन्धो ॥६

वृत्त्या पशुर् नरवपुस् त्वहमीदृ शोऽपि
श्रुत्यादि सिद्ध निखिलमात्म गुणाश्रयोऽयम् ।
इत्यादरेण कृतिनोऽपि मिथः प्रवक्तुम्
अद्यापि वञ्चनपरोत्र यतीन्द्र वर्ते ॥७

धःखा वहोऽहं अनिशं तव दुष्टचेष्टः
शब्दादि भोग निरतश् शरणागताख्यः ।
त्वत्पाद भक्त इव शिष्ट जनौघ मध्ये
मिथ्या चरामि यतिराज ततोऽस्मि मूर्खः ॥८

नियतम् त्वहं परिभवामि गुरुम् च मन्त्रम्
तद्दे वतामपि न किञ्चिदहोबि भेमि ।
इत्थं शठोऽप्य शठवत् भवदीय सङ्घे
हृष्टश्चरामि यतिराज ततोऽस्मि मूर्खः ॥९

हा हन्त हन्त मनसा क्रियया च वाचा
योहं चरामि सततं त्रिविधापचारान् ।
सोऽहं तवा प्रियकरः प्रिय कृद्ध देव
कालं नयामि यतिराज ततोऽस्मि मूर्खः ॥१०

पापे कृते यदि भवन्ति भयानु ताप
लज्जाः पुनः करणमस्य कथम् घटेत ।
मोहेन मे न भवतीह भयादि लेशः
तस्मात् पुनः पुनरघम् यतिराज कुर्वे ॥११

अन्तर् बहिस् सकल वस्तुषु सन्तमीशम्
अन्धः पुरस् स्थितमिवाहम वीक्षमाण ।
कन्दर्पवश्य हृदयस् सततं भवामि
हन्तः त्वदग्रगं अनस्य यतीन्द्र नार्हः ॥१२

तापत्रयी जनित दुःख निपातिनोऽपि
देहस्थितौ मम रुचिस्तु न तन्नि वृत्तौ ।
एतस्य कारणमहो मम पापमेव
नाथ त्वमेव हर तद् यतिराज शीघ्रम् ॥१३

वाचाम गोचर महा गुण देशिकाग्रय
कूराधि नाथ कथिताखिल नैच्य पात्रम् ।
एषोऽहमेव न पुनर्जगती दृशस् तत्
रामानुजार्य करुणैव तु मद्गतिस्ते ॥१४

शुद्धात्म यामुन गुरूत्तम कूर नाथ
भट्टाख्य देशिक वरोक्त समस्त नैच्यम् ।
अध्या स्त्य सङ्कुचित मेव मयीह लोके
तस्माद् यतीन्द्र करुणैव तु मद्गतिस्ते ॥१५

शब्दादि भोग विषया रुचिरस् मदीया
नष्टा भवत्विह भवद् दयया यतीन्द्र ।
त्वद् दास दास गणना चरमावधौ यः
तद् दासतैकर सताऽविरता ममास्तु ॥१६

श्रुत्यग्र वेद्य निज दिव्य गुण स्वरूपः
प्रत्यक्षतां उपगतस् त्विह रङ्ग राजः ।
वश्यस् सदा भवति ते यतिराज तस्मात्
शक्तस् स्वकीय जन पाप विमोचने त्वम् ॥१७

कालत्रयेऽपि करणत्रय निरमिताति
पाप क्रियस्य शरणम् भगवत् क्षमैव ।
सा च त्वयैव कमला रमणेऽर्थिता यत्
क्षेमस्स एव हि यतीन्द्र भवच्छ्रितानाम् ॥१८

श्रीमन् यतीन्द्र तव दिव्य पदाब्ज सेवाम्
श्री शैल नाथ करुणा परिणाम दत्तां ।
तामन्वहम् मम विवर्धय नाथ तस्या
कामं विरुद्धं अखिलं च निवर्तय त्वम् ॥१९

विज्ञापनं यदिदमद्य तु मामकीनम्

अङ्गी कुरुष्व यतिराज दयाम्बुराशे ।

अज्ञोऽयमात्म गुणलेश विवर्जितश्च

तस्माद् अनन्य शरणो भव तीति मत्वा ॥२०

इति यति कुल धुर्यमेध मानैः

श्रुति मधुरैर् उदितैः प्रहर्षयन्तम् ।

वर वर मुनि मेव चिन्तयन्ती

मतिरिय मेति निरत्ययम् प्रसादम् ॥ २१